श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीलक्ष्मीसहस्र अग्रमणिमाला स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीसहस्र अग्रमणिमाला स्तोत्रम् ॥

लक्ष्मी चरण राजीव लाक्षा लक्षित वक्षसे।
विश्व सर्गादि लीलाय वेङ्कट ब्रह्मणे नमः॥ १ ॥

भजे दुग्धाम्बुधिं यत्र परिष्कर्तुं हरेरुरः।
कठिनं सुकुमारं च रत्नं प्रादुरभूत् द्विधा॥ २ ॥

श्रये शेषाचल मणेः शार्ङ्गिणो हृदयङ्गमाम्।
अनुकम्पामिवाकम्पां अम्बामम्बुज वासिनीम्॥ ३ ॥

भजे भुजङ्ग शैलेश भुजान्तर परिष्क्रियाम्।
तनयां दुग्ध जलधेः दयामिव कृतोदयाम्॥ ४ ॥

लक्ष्मी वदन लावण्य सुधोदधि कृतोदयः।
कल्पवृक्षः कटाक्षात्मा काङ्क्षितानि करोतु नः॥ ५ ॥

श्रीनिवासस्य महिषीं श्रेयसे तामुपास्महे।
यदर्थमेव विदधे यत्नं भूयांसमच्युतः॥ ६ ॥

भागधेयं भजेयं तत् फणिशैल कुटुम्बिनः।
मनीषिणो यदेवाहुः मङ्गळानाञ्च मङ्गळम्॥ ७ ॥

वन्दे सौन्दर्यपर्याप्ति भूमिं कामपि देवताम्।
अब्जं सहोदरं यस्याः शंसन्त्यब्जशरं सुतम्॥ ८ ॥

दुर्ज्ञेय महिमा सा मां क्षीराब्धिदुहितावतात्।
शृङ्गाररस सर्वस्वं शेषशैलेश्वरस्य या॥ ९ ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वेश्वरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः॥ १० ॥

त्रायतामायताक्षं तद्धाम तामरसालयम्।
मदागसां प्रतीकारे महतामपि यत्क्षमम्॥ ११ ॥

विख्यात विभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान्यस्या विरिञ्च्याद्या वितन्वते॥ १२ ॥

वाराशि दुहितुस्तस्या वरिवस्यां विदध्महे।
अनन्यजनसामान्या माहुर्यस्या वदान्यताम्॥ १३ ॥

यशस्विनीमुपासीय यदुनाथसधर्मिणीम्।
यमकं कथयन्त्यार्या यत्पदं कल्पशाखिनः॥ १४ ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसङ्गतः।
अश्विनी हस्तिसम्पन्ना सम्पदुज्जृम्भते नृणाम्॥ १५ ॥

पवित्रं पद्मनाभस्य कळत्रं तत्पुनातु नः।
विचित्रं त्रिषु लोकेषु चरित्रं यस्य गीयते॥ १६ ॥

धाम्ना दृश्येय राजीव धाम्ना तेन दयालुना।
आम्नानं जातुचिद्यस्य नाम्नां ज्ञानैर्युनक्ति नः॥ १७ ॥

अरविन्दवनं वन्दे तदहं यदहर्निशम्।
प्रीतिपूर्वक मध्यास्ते पीताम्बर कुटुम्बिनी॥ १८ ॥

अभयं भयमित्येतदुभयं सर्वदेहिनाम्।
यत्सेवातदभावाभ्यां तामहं श्रियमाश्रये॥ १९ ॥

वन्दारुरक्षणे दक्षां वन्दे गोविन्द सुन्दरीम्।
यत्प्रसादादृते देवाः सर्वे रक्षितुमक्षमाः॥ २० ॥

दशस्वप्यवतारेषु देवो यद्रूप संश्रयात्।
साधयामास कार्याणि सतान्तस्यै श्रियै नमः॥ २१ ॥

कमलायतनां चित्ते कलये यत्पदाम्बुजम्।
चिरं विबुधसन्मौळिचित्रस्तबक भूषितम्॥ २२ ॥

समस्तगुणविस्तार समावेश निवेशनम्।
वन्देऽरविन्दनिलयं वरदं परदैवतम्॥ २३ ॥

शरणीकरणीयाङ्घ्रिं शाश्वत्तापत्रयातुरैः।
सर्वनिर्वेदशमनीं समस्तजननीं नुमः॥ २४ ॥

दुग्धां दुग्धाम्बुधेःपुत्री दुरितापहरा मम।
शार्ङ्गिणश्चरणाम्भोज शरणागतिसम्पदम्॥ २५ ॥

॥ इति श्रीलक्ष्मीसहस्र अग्रमणिमाला स्तोत्रम् संपूर्णम्॥